Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ मृत्युञ्जयमन्त्रविधानमुच्यते —

कहोळक ऋषिः । देवीगायत्री छन्दः । मृत्युञ्जयरुद्रो देवता । जुं बीजम् । सः शक्तिः । सां हृत् । सीं शिरः । इत्याद्यङ्गानि । नाभिहृद् भ्रूमध्येषु अक्षरान्न्यसेत् । ध्यानम् —

स्फुटितनळिनसंस्थं मौळिबद्धेन्दुरेखा-
गळदमृतजलार्द्रं चन्द्रवह्न्यर्कनेत्रम् ।
स्वकरकलितमुद्रापाशवेदाक्षमालं
स्फटिकरजतमुक्तागौरमीशं नमामि ॥

तत्र वेदो हरिणशिशुः । *ओं जुं सः, इति मन्त्रः ॥

खससमः कर्णयुतोर्ध्व(र्ध)चन्द्रवान् कुपञ्चमो विन्दुयुतो ध्रुवादिकः ।
मनुस्त्वयं मृत्युजयात्मकः स्फुटं समीरितस्साधकरक्षणक्षमः ॥

इति मन्त्रोद्धारः । त्रिलक्षजपः । गळूच्या दुग्धमिश्रिताज्यसिक्तया दशांशं जुहुयात् । पुरश्चरणाहोमः । आयुःप्रधानोयं मन्त्रः ॥

* ॐ जूं सः इति मृत्युञ्जयमन्त्रः । ॐ वं जूं सः इति अमृतमृत्युञ्जयमन्त्रः इति मन्त्रज्ञानामाशयः ।

अथ पूजा—

प्रासादोक्ते शैवपीठे समावाह्य समर्चयेत् । अङ्गैः प्रथमावृतिः । इन्द्रादिभिर्द्वितीया । वज्रादिभिस्तृतीया ॥

अस्य यन्त्रमाह—

आदौ तारं विलिखतु ससाध्याह्वयं कर्णिकायां
दिक्पत्रेष्वप्यपरमपरं चापि तत्कोणकेषु ।
भूयो भूमेः पुरमनुमृगाङ्कं तदश्रेषु टान्तं
जप्त्वा बद्धं ग्रहगदविपध्वंसि यन्त्रं तदेतत् ॥

प्रथममष्टपत्रं पद्मं विलिख्य तत्कर्णिकायां प्रणवं विलिख्य तदन्तस्साध्यनामादीन् विलिखेत् । पुनः पूर्वादिदिक्पत्रचतुष्टये तु जुं इति विलिखेत् । पुनः आग्नेयादिकोणपत्रचतुष्टये तु सः इति विलिखेत् । पुनस्तद्बहिश्चतुरश्रं विलिख्य तद्बहिरावृतिरूपेण ठ इति विलिख्य चतुरश्रकोणेषु चतुर्ष्वपि ठं इति विलिखेत् ॥ एवं विलिख्य जप्त्वा धारयेत् । ग्रहगदादिध्वंसनकरमायुष्करं च (भवति) ॥

अस्मिन्मण्डले शैवपीठं संपूज्य, कलशं संपूर्य मूर्तिं संपूज्य जप्त्वाऽभिषिञ्चेत्साध्यम् ॥ श्रीवश्यकरं ग्रहाभिचारहरं (च भवति) ॥

प्रयोगान्तरम्—

ततः छिन्नोद्भवानां तु समिद्भिश्चतुरंगुलैः ।
दुग्धसिक्तैस्समिद्धेऽग्नौ पद्महस्रद्वयं हुनेत् ॥

यस्तु वह्नौ जुहोत्येवं यावत्संख्येन साधकः ।
तावत्संख्यैस्सुधाकुम्भैरग्निः प्रीणाति शंकरम् ॥

आप्यायितोग्निना शर्वः साधकस्येप्सितान्वरान् ।
प्रदद्यादायुराद्यांश्च दुरन्तान्प्रळयान्तिकान् ॥

छिन्नोद्भवं–गुळवेळ சீந்தில் கொடி चतुरंगुलं– கொன்றை आरग्वधश्चतुरंगुल इति वचनात् ॥ उभाभ्यां संभूय द्वादशसहस्रमित्यर्थः ॥

ओं जुं सः इत्यनन्तरं पालयपदयुगळयुक्तं साध्यनाम चोक्त्वानन्तरमपि सः जुं ओं इति प्रतिलोमेन योजयेत् । इदमपि मृत्युञ्जयमन्त्रान्तरम् ॥

अथ पूर्वोक्तमन्त्रस्यैव प्रयोगान्तरम्—

अमृतावटतिलदूर्वाः पयो घृतं पायसं क्रमेणेति ।
सप्त द्रव्याण्युक्तान्येतैर्जुहुयात्पृथक् सहस्रतयम् ॥

तीव्रे ज्वरे घोरतरेभिचारे सोन्मादके दाहगदे च मोहे ।
तनोति शान्तिं नचिरेण होमः संजीवनं चाब्दशतप्रमाणम् ॥

संभोजयेत् होमदिनेषु विप्रान् सप्ताधिकान् स्वादुभिरन्नजातैः ।
सतर्णका गां च हुतावसाने दद्यात् द्विजेभ्यो हुतकर्मकृद्भ्यः ॥

अयमर्थः— उक्तान्यमृतादिसप्तद्रव्याणि क्रमेण नित्यशः एकैकं सप्तदिनं सहस्रसंख्यं हुनेत् दिनशः सप्तगुणितत्वेन भोजयेच । सापत्यां गां चाध्वर्यवे दद्यात् । तस्मादुक्तफल भवति ॥

प्रयोगान्तरम्—

चतुरंगुलपरिमाणैरमृताकाण्डैरथार्कसाहस्रम् ।
जुहुयाच दुग्धसिक्तैरारोग्यायायुषे च लक्ष्म्यै च ॥

अर्कसहस्रं द्वादशसहस्रम् ॥

प्रयोगान्तरम् —

> निजजन्मदिने शतं शतं यो जुहुयाद्द्रव्यवरैश्च सप्तसंख्यैः ।
> मधुरैः प्रतिभोजयेच्च विप्रानभिवाञ्छन्नियमेन दीर्घमायुः ॥

अयमर्थः — प्रतिमासं जन्मानुजन्मत्रिजन्मदिने अमृताद्युक्तसप्तद्रव्याणि सर्वाण्येकैकं शतसंख्यया जुहुयात् । मधुरान्नैः ब्राह्मणान् भोजयेच्च दीर्घमायुरभिकांक्षन् ॥

प्रयोगान्तरम् —

> अथवा सप्तभिरेतैर्द्रव्यैरेकेन वा सहस्रतयम् ।
> जन्मर्क्षहोममात्रान् निरुपद्रवमुत्तमं व्रजेदायुः ॥

अयमर्थः — जन्मानुजन्मत्रिजन्मदिने पूर्वोक्तसप्तद्रव्यैस्सर्वैस्संभूय सहस्रं हुनेत् । अथवा एतैर्द्रव्यैरेकैकैरेव सहस्रसंख्यं क्रमेण प्रतिनक्षत्रं जुहुयात् । निरुपद्रवेण दीर्घमायुर्भवति ॥

प्रयोगान्तरम् —

> दूर्वात्रितयैः पयसा जुहुयादेकादशाहुतीर्दिनशः ।
> जित्वापमृत्युरोगान् प्रयात्यसावायुषश्च दैर्घ्यमपि ॥

दूर्वात्रितयं पयस्सिक्तं जुहुयात् ॥

प्रयोगान्तरम् —

> जन्मर्क्षाणां त्रितये छिन्नाकाश्मर्यवकुळजैरिध्मैः ।
> क्रमशो हुनेत्सहस्रं नश्यन्त्यपमृत्युरोगदुरितानि ॥

अयमर्थः — अश्वतीमघमूलमित्यादिजन्मानुजन्मत्रिजन्मनक्षत्रेषु एकैकमेकैकस्मिन् दिने सहस्रसंख्यं हुनेदिति ॥

छिन्ना—गुळवेल । काश्मर्य—प्यरंकुमुल्-பெருங்குமிழ் वकुलं—घोळसरी-மகிழ்.

प्रयोगान्तरम् —

सितसिद्धार्थसहस्राहुत्या नश्यत्युपद्रवो ज्वरजः ।
तद्वदपामार्गहुतान्मर्त्यो जयमप्यरोगतां लभते ॥

सितसिद्धार्थे–पाण्डरामोहरया । अपामार्ग–आघाडा ॥

प्रयोगान्तरम् —

एतदेव सप्तकृत्वो हुनेदिति मृत्युञ्जयविषये कल्पान्तरे उक्तत्वात्, ‘विकारानुगुण मन्त्री वर्धयेद्धोमवासरान् ।’ इति शारदातिलके सप्तद्रव्य-मृत्युञ्जयविषये उक्तत्वाच्च, एतैरमृतादिसप्तद्रव्यैः सप्तकृत्व एकोनपञ्चाशद्भि-र्दिनैर्हुनेत् ॥ *तत्र सप्तद्रव्यैः एकवारहोमे जाते तस्य न मृत्युर्भवति । इति प्रसिद्ध(द्धि)बलात् प्राणबाधावस्थायां एकवारं सप्तद्रव्याणि क्रमेण हुत्वा, पुनरपि क्रमेणारभ्य, पुनरपि समापयेत् । एवं सप्तकृत्वो हुनेत् । अन्यथा तु स्वस्थानस्थायां चेत्, प्रथमद्रव्यमेव सप्तदिनैर्हुत्वा पुनर्द्वितीयद्रव्यं च सप्तदिनैर्हुनेत् । एवं प्रकारेण सप्तद्रव्याण्यपि समापयेत् । एतन्महा-मृत्युञ्जयसंज्ञं भवति ॥

इति प्रपञ्चसारसारसङ्ग्रहे गीर्वाणेन्द्रविरचिते
षड्विंश पटल ॥

* तत इति ङ पाठ ।